No. ४३६४

Title सांख्य कारिका

Author श्री ईश्वर कृष्णः

Extent २ Age ऽ

Subject सांख्यं

सांख्यकारिका:

४३७४

सां॰का॰ ॥ श्रीगणेशाय नमः ॥ दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ । दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् १ दृष्टवदानुश्र-
१ विकः स ह्यविशुद्धिक्षयातिशययुक्तः । तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् २ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृ-
तयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ३ प्रमाणमिष्टं त्रिविधं दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्प्रमे-
यसिद्धिः प्रमाणाद्धि ४ प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् । तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ५ सा-
मान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् । तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम् ६ अतिदूरात्सामीप्यादिन्द्रियघा-
तान्मनोऽनवस्थानात् । सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च ७ सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः । म-
हदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ८ असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् । शक्तस्य शक्यकरणात्कारणभावा-
च्च सत्कार्यम् ९ हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् । सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् १० त्रिगुणमविवे-
कि विषयः सामान्यमचेतनं प्रसवधर्मि । व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ११ प्रीत्यप्रीतिविषादात्मकाः गुणाः प्रका-
शप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः इति १२ सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं
च रजः । गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः १३ अविवेक्यादेः सिद्धिस्त्रैगुण्यात्तद्विपर्ययाभावात् । कारणगुणात्मकत्वा-
त्कार्यस्याव्यक्तमपि सिद्धम् १४ भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च । कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य १५
कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च । परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् १६ संघातपरार्थत्वात्त्रि-
गुणादिविपर्ययादधिष्ठानात् । पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च १७ जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्ते-
श्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव १८ तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य । कैवल्यं माध्यस्थ्यं द्रष्टृत्वम-
कर्तृभावश्च १९ तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् । गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः २० प्रकृतेर्महांस्त-
तोऽहंकारस्तस्माद्गणश्च षोडशकः । तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि २२ अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्व-
र्यम् । सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् २३ अभिमानोऽहंकारस्तस्माद्द्विविधः प्रवर्तते सर्गः । एकादशकश्च गणस्त- १

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य । पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः २१

स्मात्रपंचकश्चैव २४ सात्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात् भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् २५ बुद्धीन्द्रिया
णि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः २६ उभयात्मकमत्र मनः संकल्पकमिन्द्रि
यं च साधर्म्यात् गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च २७ शब्दादिषु पंचानामालोचनमात्रमिष्यते वृत्तिः वचनादानविहर
णोत्सर्गानन्दाश्च पंचानाम् २८ स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या सामान्यकरणवृत्तिः प्राणाद्या वायवः पंच २९ युग
पच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ३० स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिं
पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणम् ३१ करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् कार्यं च तस्य दशधाहार्यं धा
र्यं प्रकाश्यं च ३२ अंतःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणम् ३३ अंतःकर
णं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणम् ३३ बुद्धीन्द्रियाणि तेषां पंच विशेषावि
शेषविषयाणि वाग्भवति शब्दविषया शेषाणि तु पंचविषयाणि ३४ सांतःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् तस्मात्त्रि
विधं करणं द्वारि द्वाराणि शेषाणि ३५ एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छ
न्ति ३६ सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ३७ तन्मात्राण्यविशे
षास्तेभ्यो भूतानि पंच पंचभ्यः एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ३८ सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः सू
क्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते ३९ पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम् संसरति निरुपभोगं भावैरधिवा
सितं लिङ्गम् चित्रं यथाश्रयमृते स्थाण्वादिभ्यो यथा विना छाया तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ४१ पुरुषार्थहे
तुकमिदं निमित्तनैमित्तिकप्रसंगेन प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिंगम् ४२ सांसिद्धिकाश्च भावाः प्राकृतिका वैकृति
काश्च धर्माद्याः दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ४३ धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ज्ञाने
न चापवर्गो विपर्ययादिष्यते बन्धः ४४ वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ऐश्वर्यादविघातस्तथा विप
र्ययात्तद्विपर्यासः ४५ एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः गुणवैषम्यविमर्दात्तस्य भेदास्तु पंचाशत् ४६ पंच विप
र्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात् अष्टाविंशतिभेदा तुष्टिर्नवधाष्टधा सिद्धिः ४७ भेदस्तमसोऽष्टविधो मोहस्य च दश

सांका· ष्टविधो महामोहः तामिस्रोष्टादशधा तथा भवत्यन्धतामिस्रः एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा सप्तद
२ शधा बुधविपर्ययात्तुष्टिसिद्धीनाम् आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः बाह्या विषयोपरमात्पञ्च नवत
ष्टयोभिमताः ५० ऊहः शब्दोध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोष्टौ सिद्धेः पूर्वोङ्कुशस्त्रिविधः ५१ न विना भा
वैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः लिङ्गाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्तते सर्गः ५२ अष्टविकल्पो दैवस्तैर्यग्योनश्च
पञ्चधा भवति मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः मध्ये रजोवि
शालो ब्रह्मादिस्तम्बपर्यन्तः जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन ५५ इत्ये
ष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ५६ वत्सविवृद्धिनिमित्तं क्षीरस्य यथा
प्रवृत्तिरज्ञस्य पुरुषस्य विमोक्षार्थं तथा प्रवृत्तिः प्रधानस्य ५७ औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः पु
रुषविमोक्षनिमित्तं प्रवर्तते तद्वदव्यक्तम् ५८ रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् पुरुषस्य तथात्मानं प्र
काश्य निवर्तते प्रकृतिः ५९ नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ६०
प्रकृतेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ६१ तस्मान्न बध्यते नापि मु
च्यते नापि संसरति कश्चित् संसरति बध्यते च मुच्यते च नानाश्रया प्रकृतिः ६२ रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना
प्रकृतिः सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् अविपर्ययाद्विशु
द्धं केवलमुत्पद्यते ज्ञानम् ६४ तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम् प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थि
तः स्वस्थः ६५ दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या सति संयोगेपि तयोः प्रयोजनं नास्ति सर्गस्य ६६ सम्यग्ज्ञा
नाधिगमाद्धर्मादीनामकारणप्राप्तौ तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ६७ प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधा
ननिवृत्तौ ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ६८ पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् स्थित्युत्प
त्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ६९ एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ आसुरिरपि पञ्चशिखाय तेन च बहु
धा कृतं तन्त्रम् ७० सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य आख्यायिकाविरहिताः परवादविवर्जिताश्चेति ७१ इ